विड़ं, क्ली, ( विड़ आक्रोशे+इगुपधेति कः । ) लवणविशेषः । विट्लुण इति भाषा ॥ यथा,—
"पाक्यं विड़ञ्च कृतके द्वयम् ।" इत्यमरः ॥ द्वे समुद्रतीरासन्नभवां लवणमृत्तिकां पाचयित्वा निष्पादिते लवणे । विट्लवणे । इति केचित् । कृतके कृत्रिमे । पाक्यविड़्लवणयोर्भेदेऽपि कृतकत्वात् ऐक्यमिति स्वामी ॥ पच्यते इति पाक्यम् । डु पच ष पाके ऋहलोर्ण्यदिति ण्यत् चजोःकुघिण्ण्यतोरिति कः पाकेन निष्पादितमिति ष्यञो वा । वेड़ति भिनत्ति विड़ं विड़ाक्रोशे इगुपधलात् कः । इति भरतः ॥ तत्पर्य्यायः । विड़्गन्धम् २ काललवणम् ३ विड़्लवणम् ४ । इति रत्नमाला ॥ द्राविड़कम् ५ खण्डम् ६ कृतकम् ७ क्षारम् ८ आसुरम् ९ सुपाक्यम् १० खण्डलवणम् ११ धूर्त्तम् १२ कृत्रिमकम् १३ । अस्य गुणाः । उष्णत्वम् । दीपनत्वम् । रुच्यत्वम् । वाताजीर्णशूलगुल्ममेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"विड़ं सक्षारमूर्द्धाधः कफं वातानुलोमनम् ॥
ऊर्द्ध्वं कफमधो वातं सञ्चारयेदित्यर्थः ।
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च ।
विबन्धानाहविष्टम्भहृद्गौरवशूलनुत् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"विड़ं लवणमुत्क्लेदि वह्निर्वैलविवर्द्धनम् ।
मलवातामविष्टम्भशूलाटोपविबन्धनुत् ॥"
इति राजवल्लभः ॥

विड़ङ्गं, क्ली पुं, ( विड़ आक्रोशे+"विड़ादिभ्यः कित् ।" उणा० १ । १२० । इति अङ्गच् । स च कित् । ) स्वनामख्यातौषधम् । ( यथा, बृहत्संहितायाम् । ५५ । ७ ।
"घृतोशीरतिलक्षौद्रविड़ङ्गक्षीरगोमयैः ।
आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥" )
तत्पर्य्यायः । वेल्लम् २ अमोघा ३ चित्रतण्डुला ४ तण्डुलः ५ क्रिमिघ्नः ६ । इत्यमरः ॥ रसायनः ७ पावकः ८ भस्मकम् ९ । इति जटाधरः । वेलुः १० मोघा ११ तण्डुः १२ । इति शब्दरत्नावली ॥ जन्तुघ्नम् १३ चित्रतण्डुलम् १४ क्रिमिघ्नम् १५ क्रिमिशत्रुः १६ गर्द्दभम् १७ केवलम् १८ । इति रत्नमाला ॥ विड़ङ्गा १९ क्रमिहा २० चित्रा २१ तण्डुला २२ तण्डुलीयका २३ वातारितण्डुला २४ जन्तुघ्नी २५ मृगगामिनी २६ वैराली २७ गहरा २८ कापाली २९ वरासुः ३० चित्रबीजा ३१ जन्तुहन्त्री ३२ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । वातकफार्त्तिमान्द्यारुचिभ्रान्तिक्रमिदोषविनाशित्वञ्च । इति राजनिर्घण्टः ॥ ईषत्तिक्तत्वम् । क्रिमिविषनाशित्वञ्च । इति राजवल्लभः ॥
"विड़ङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मक्रिमिवातविबन्धनुत् ॥"
इति भावप्रकाशः ॥

विड़ङ्गः, त्रि, (विड़+अङ्गच् ।) अभिज्ञः । इति मेदिनी । गे, ४९ ॥

विड़म्बनं, क्ली, (वि+ड़म्ब+ल्युट् ।) अनुकरण[ । यथा,—
"न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विड़म्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचि-
द्द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥"
इति श्रीभागवते । १ । ८ । २९ ॥
प्रतारणम् । यथा, तत्रैव ।
"जन्म कर्म्म च विश्वात्मन्नजस्याकर्त्तुरात्मनः ।
तिर्य्यङ्नृषिषु यादःसु तदत्यन्तविड़म्बनम् ॥" ३० ॥

विड़म्बना, स्त्री, ( वि+ड़म्ब+णिच्+युच् । टाप् । ) अनुकरणम् । ( यथा, कुमारे । ४ । १२ ।
"असति त्वयि वारुणीमदः
प्रमदानामधुना विड़म्बना ॥")
प्रतारणम् । ( यथा, पञ्चतन्त्रे । ४ । ४६ ।
"नो चेदेतेषां सकाशात् विड़म्बनां प्राप्य मरिष्यसि ॥"*॥ परिहासः । यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विड़म्बना
यदूढ़या वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")

विड़म्बितः, त्रि, ( वि+ड़म्ब+क्तः । ) कृतविड़म्बनः । तत्पर्य्यायः । व्यस्तः २ आकुलः ३ दुर्गतः ४ । इति शब्दमाला ॥ ( अनुकृतः । यथा, रघुः । ३ । ५२ ।
"अतिष्ठदालीढ़विशेषशोभिना
वपुःप्रकर्षेण विड़म्बितेश्वरः ॥")

विड़ारकः, पुं, ( विड़ाल एव । स्वार्थे कन् । लस्य रः । ) विड़ालः । इति शब्दरत्नावली ॥

वि(बि)ड़ालः, पुं, ( विड़ आक्रोशे+"तमिविशिविड़ीति ।" उणा० १ । ११७ । इति कालन् ।) नेत्रपिण्डः । इति मेदिनी । ले, १३३ ॥ नेत्रौषधविशेषः । इति भावप्रकाशः ॥ स्वनामख्यातपशुः । बिल्ली इति हिन्दीभाषा । तत्पर्य्यायः । ओतुः २ मार्ज्जारः ३ वृषदंशकः ४ आखुभुक् ५ । इत्यमरः ॥ विरालः ६ बिलालः ७ । इति तट्टीका ॥ दीप्ताक्षः ८ नक्तचारी ९ जाहकः १० विड़ारकः ११ । इति शब्दरत्नावली ॥ त्रिशङ्कुः १२ जिह्मापः १३ मेनादः १४ सूचकः १५ । इति जटाधरः ॥ भूबिकारातिः १६ शालावृकः १७ मायावी १८ दीप्तलोचनः १९ । इति राजनिर्घण्टः ॥ ( यथा, मनुः । ११ । १६० ।
"विड़ालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च ।
केशकीटावपन्नञ्च पिबेद्ब्रह्मसुवर्च्चलाम् ॥")

वि(बि)ड़ालकं, क्ली, हरितालम् । इति हेमचन्द्रः ॥

वि(बि)ड़ालकः, पुं, ( विड़ाल एव । स्वार्थे कन् ।) विड़ालः । नेत्ररोगस्य औषधविशेषः । यथा । अथ विड़ालकविधिः ।
"विड़ालको बहिर्लेपो नेत्रे पक्ष्मविवर्ज्जिते ।
तस्य मात्रा परिज्ञेयो मुखालेपविधानवत् ॥"
मुखालेपो यथा,—
"अङ्गुलस्य चतुर्थांशो मुखालेपः कनिष्ठिकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न
शुष्यति ।
तेनापि गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
स यथा ।
"यष्टिगैरिकसिन्धूत्थदार्व्वीतार्क्ष्यैः समांशकैः ।"
जलपिष्टैर्बहिर्लेपः सर्व्वनेत्रामयापहः ॥"
तार्क्ष्यं रसाञ्जनम् ।
"रसाञ्जनेन बालेयः पथ्याविल्वदलैरपि ।
वचाहरिद्राविश्वैर्व्वा तथा नागरगैरिकैः ॥"
इति भावप्रकाशः ॥

वि(बि)ड़ालपदः, पुं, तोलकद्वयपरिमाणम् । यथा,
"तोलौ द्वौ पिचुरक्षश्च सुवर्णं कड़वग्रहः ।
विड़ालपदकर्षौ च पाणीतलमुडुम्बरम् ॥"
इति शब्दमाला ॥
मार्ज्जारचरणे, स्त्री ॥

वि(बि)ड़ालपदकं, क्ली, कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

वि(बि)ड़ाली, स्त्री, विदारी । इति राजनिर्घण्टः ॥ ( मार्ज्जारी ॥ )

विडीनं, क्ली, ( वि+डी+क्तः । ) खगगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।
विडीनमवडीनञ्च निडीनं डीनडीनकम् ॥
गतागतप्रगतितसम्पाताद्याश्च पक्षिणाम् ।
गतिभेदाः पक्षिगृहं कुलायो नीड़मस्त्रियाम् ॥"
इति जटाधरः ॥

विड़ुलः, पुं, वेतसवृक्षः । इति हेमचन्द्रः ॥

विड़ोजाः, [ स् ] पुं, ( विष् व्याप्तौ+क्विप् । विट् व्यापकं ओजो यस्य । ) इन्द्रः । इत्यमरः ॥

विड़ौजाः, [ स् ] पुं. ( विड़ं आक्रोशि शत्रुद्वेषमसहिष्णु ओजो यस्य । ) इन्द्रः । इति भरतीयद्विरूपकोषः ॥ ( यथा, रघौ । ३ । ५९ ।
"रघुः शशाङ्कार्द्धमुखेन पत्रिणा
शरासनज्यामलुनाद्बिड़ौजसः ॥" )

विड़्, [ श् ] पुं, ( विशतीति । विश+क्विप् । ). वैश्यः । यथा विट् विड़् विशौ विशः । इति मुग्धबोधव्याकरणम् ॥ ( मनुजः । विशांपति· शब्ददर्शनात् ॥ )

विड़्, [ ष् ] स्त्री, विष्ठा । इति विड़्गन्धादिशब्ददर्शनात् ॥

विड़्गन्धं, क्ली, ( विड्वत् गन्धो यस्य । ) विड़्लवणम् । इति रत्नमाला ॥

विड़्जः, त्रि, विष्ठाजातः । विष्शब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

विड़्लवणं, क्ली, ( विड्वत् दुर्गन्धं लवणम् । ) विड़म् । इति रत्नमाला ॥ विट्लुण इति भाषा ॥

विड़्वराहः, पुं, ( विट्प्रियो वराहः । ) ग्राम्यशूकरः । इति जटाधरः ॥ ( यथा, मनुः । ५ । १९ ।